# मिथ्यात्वप्रथमलक्षणे व्याघातविचारः

**Rajaram Shukla**

**Professor**

**Banaras Hindu University,**

**Varanasi**

अद्वैतसिद्धिकारेण आचार्येण ग्रन्थारम्भे मिथ्यात्वे विप्रतिपत्तिं प्रदर्शयता त्रीणि पक्षविशेषणानि निर्दिष्टानि । ब्रह्मप्रमातिरिक्ताबाध्यत्वं, सत्वेन प्रतीत्यर्हत्वं, चिद्भिन्नत्वम् इति । अनुमाने पक्षविशेषणानि सपक्षस्य विपक्षस्य वा व्यावृत्यर्थमुपादीयन्ते । अत्रापि आद्यं विशेषणं सपक्षस्य शुक्तिरुप्यस्य, अन्त्यं च विपक्षस्य ब्रह्मण: व्यावृत्यर्थमुपात्तम्। सत्वेन प्रतीत्यर्हत्वमित्येतदपि विपक्षस्य अलीकस्य व्यावृत्यर्थम् उपात्तं विशेषणमिति वदन्ति ।

अत्रेयं शङ्का भवति । यद्यपि अद्वैतिमते असतः अमिथ्यात्वात् विपक्षत्वं युज्यते तथापि नैयायिकमाध्वयोः मते अलीकं न विपक्षः । यतः, यत् न सत्यं तत्सर्वं मिथ्यैव इति ते मन्यन्ते । अतः अलीकस्यापि मिथ्यात्वमेवेत्यतः न तस्य विपक्षत्वम् । इत्थं परमतरीत्या अलीकस्य विपक्षत्वाभावादेव विपक्षव्यावर्तकत्वं द्वितीय विशेषणस्य कथं युज्यते इति । तत्र वक्तव्यम् ; सिद्धान्तिनां रीत्या अलीकं विपक्षः इत्येतावन्मात्रेण तद्व्यावर्तकं विशेषणं प्रयोक्तुं शक्यते इति । अलीकस्य विपक्षत्वेन उभयवादिसम्मतत्वं नापेक्ष्यते तद्व्यावर्तकविशेषणदानाय इति ।

**प्रथममिथ्यात्वलक्षणे आद्यविकल्पः**

सदसत्वानधिकरणत्वम् अनिर्वचनीयत्वमिति अनिर्वचनीयत्वरूपमिथ्यात्वस्य स्वरूपं प्रदर्श्य न्यायामृतोक्ताः त्रयो विकल्पाः सिद्धौ अनूदिताः । तत्र आद्यविकल्पः “असत्वविशिष्टसत्वाभाव:” इति प्रदत्तः । अत्रेयमाशङ्का भवति ; सदसत्वानधिकरणत्वमिति शब्दात् यदा विकल्पाः उत्थाप्यन्ते तदा शब्दस्वारस्यानुसारं “सत्वविशिष्टासत्वाभावः” इति वक्तव्यमासीत् । स्वीकृतश्च स एव पाठः सिद्धिव्याख्यायाम् । तर्हि अन्यत्र मुद्रणदोषः स्यादिति चेन्न । ब्रह्मानन्दीये बुद्धिपूर्वकमेव "असत्वविशिष्टसत्वाभावः" इत्येव आनुपूर्वी स्वीकृत्य व्याख्यातत्वात् । यद्यपि अत्र विशेषणविशेष्य भावव्यत्यासेऽपि तात्पर्ये न वैलक्षण्यं , खण्डनेऽपि न; तथापि सिद्धिकारसम्मतः पाठः कः स्यात् इति निर्णेतव्ये "सत्वमात्राधारे जगति असत्वविशिष्टसत्वात्यन्ताभावस्य सिद्धत्वेन " इत्याद्युत्तरग्रन्थपर्यालोचनया सत्वविशेष्यककल्प एव सम्मत इति मन्तव्यम् । ननु तत्रापि “सत्वविशिष्टासत्व” इति पाठपरिवर्तनमस्तु इति चेन्न । सत्वस्य विशेष्यत्वौचित्यात् । सत्वं हि सिद्धं जगति परमते , न असत्वम् । अतः सिद्धे तस्मिन् सत्वे सामानाधिकरण्येन असत्वं विशेषणं प्रकल्प्य आद्यकल्पस्य उत्थाप्यमानत्वात् ब्रह्मानन्दीयादितः पाठ एव समीचीन इति निश्चीयते । सदसत्वानधिकरणत्वमित्यस्मिन् समासे सत्पदस्य पूर्वनिपातेऽपि ततो विकल्पविरचनकाले अर्थालोचनयैव विशेषणविशेष्यभावस्य निर्णेतव्यत्वात् ।

सोऽप्यभावः असत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताक एवात्र विवक्षितः । अन्यथा विशिष्टं शुद्धान्नातिरिच्यते इति न्यायेन असत्वविशिष्टसत्वस्य सत्त्वस्य च ऐक्यात् , सत्वस्य च जगति सत्वात् तदत्यन्ताभावस्य सिद्धत्वोक्त्ययोगापत्तेः।

यदा तु असत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकः अभावः विवक्ष्यते तदा विशेषणाभावप्रयुक्तः विशिष्टाभावः असत्वाभावप्रयुक्तः असत्वविशिष्टसत्वाभावः जगति सिद्धः इति सिद्धसाधनं निरूपयितुं शक्यते ।

**द्वितीयविकल्पः**

"सत्वात्यन्ताभावासत्वात्यन्ताभावरूपधर्मद्वयम्" इति द्वितीयविकल्पः । अत्र पूर्वपक्षिभिः व्याघातः उद्भावितोऽस्ति । यत्र सत्वाभावः तत्र असत्वेन अवश्यं भवितव्यम् । यत्र असत्वाभावः तत्र सत्वेनापि । अत: द्वाविमौ अभावौ न समानाधिकरणौ भवितुमर्हतः इति । असामानाधिकरण्यमेवात्र व्याघातः ।

अत्र एकाभावे अपरसत्वस्य आवश्यकता किं प्रयुक्ता इति व्याघातप्रयोजकं परीक्षितुं सिद्धिकारैः विकल्पः दर्शितः ; किं सत्वासत्वयोः परस्परविरहरूपत्वात् उत परस्परविरहव्यापकत्वात् आहोस्वित् परस्परहविरहव्यप्यत्वात् इति ।

**व्याघात प्रयोजकम्**

वह्नितदभावयोः परस्परविरहरूपत्वमस्ति । अतः तयोः स्वयम् एकत्रावस्थानं नास्ति । तदभावयोरपि नास्ति । अतः एकाभावसत्वे वह्न्यभावाभावसत्वे वह्नेः आवश्यकत्वं तत्रायाति ।

एवं वह्न्यभाव जलाभावयोः परस्परविरहव्यापकता अस्ति । यत्र यत्र जलाभावाभाव: (जलं) तत्र वह्न्यभाव: , यत्र यत्र वह्न्यभावाभाव: (वह्निः) तत्र जलाभावः - इति । अत्र परस्परविरहव्यापकयोः वह्न्यभावजलाभावयो: स्वयमेकत्रावस्थाने न कोपि विरोधः। क्वचिन्भूतलादौ गुणादौ वा वह्न्यभाव जलाभावयोः सत्वात् । किन्तु तदभावात्मकयो वह्निजलयोरेव विरोधः । इदं पूर्वस्माद्वैलक्षण्यम् । परस्परविरहरूपयोस्तु धर्मयोः अभावावपि न समानाधिकरणौ तत्प्रतियोगिनावपि इति।

एवं परस्परविरहव्याप्यतापि परीक्षणीया । वह्निजलयोः परस्परविरहव्याप्यता अस्ति । यत्र जलं तत्र वह्निविरह: , यत्र वह्निस्तत्र जलविरहः इति । तत्र तु प्रतियोगिनोरसामानाधिकरण्यमस्ति । परन्तु अभावयोः सामानाधिकरण्ये न कापि क्षति: इति लोके दृष्टम् । वह्व्यभावजलाभावयोरेकत्र दर्शनात् । अत एव परस्परविरहव्याप्ययोः द्वयो धर्मयोरभावौ यद्येकत्र साध्येत तदा न व्याघातदोषः ; प्रकृते च साध्यघटकयोः सत्वासत्वयोः परस्परविरहव्याप्यत्वमेव यथा स्यात् तथा तत्स्वरूपं परिष्कृत्य साध्यघटकतया अस्माभिः निवेश्यते इत्यतः नात्र व्याघातदोषः इत्युक्तं सिद्धिकारैः ।

**इदमत्र फलितम्**

- परस्परविरहरूपयो: द्वयोः धर्मयोः न सामानाधिकरण्यम् । तदभावयोश्च न सामानाधिकरण्यम् |
- परस्परविरहव्यापकयो. द्वयो: धर्मयोः सामानाधिकरण्यं । तदभावयोस्तु न सामानाधिकरण्यम् ।
- परस्परविरहव्यप्ययोः द्वयोः न सामानाधिकरणयं । तदभावयोस्तु भवति सामानाधिकरण्यं ।

इत्थं व्याघातस्य त्रैविध्ये भवति चेदपि परस्परविरहव्याप्ययोः द्वयोः व्याघातोस्तु तदभावयोस्तु सः नास्ति । प्रकृते अपि तदभावयोरेव एकत्र धर्मिणि अस्माभिः साध्यमानतया न व्याघातावकाश: इति सिद्धिकाराणामाशयः । अतः

यत्र द्वयो: धर्मयोः परस्परविरहव्याप्यता तत्र व्याघातदोषो न भवति इति आपाततो न वक्तव्यं ; तत्रापि व्याघातदोषो भवेदेव यदि तावेव धर्मौ एकत्र साध्येते । यत्र तु तदभावौ एकत्र साध्येते तत्र व्याघातदोषो नास्ति इत्येव वक्तव्यम्। मिथ्यात्ववादिभिः परस्परविरहव्यापके सत्वासत्वे न एकत्र साध्येते किन्तु तदभावावेव इत्यतः न दोषः इति ।।